

भाषातन्त्रम्

कौटिलीयार्थशास्त्रसंशोधकेन विदुषा महामहोपाध्यायबिरुदभाजा

डा. आर्. शामशास्त्रिणा

विरचितः प्रबन्धः

प्रसाराङ्गम्

कर्नाटकसंस्कृतविश्वविद्यालयः

बेङ्गलूरु - ५६० ०१८

प्राच्यप्रबन्धमाला - १

भाषातन्त्रम्

कौटिलीयार्थशास्त्रसंशोधकेन विदुषा महामहोपाध्यायबिरुदभाजा

डा. आर्. शामशास्त्रिणा

विरचितः प्रबन्धः

सम्पादकः

प्रो. श्रीनिवास वरखेडी

प्रसाराङ्गम्

कर्नाटकसंस्कृतविश्वविद्यालयः

बेङ्गलूरु

२०१२

BHASHA TANTRAM by **Mahamahopadhyaya**
Dr. R. Shamashastry - An article published in the journal of Mysore Maharaja Samskrita College in 1926,
Edited by - **Prof. Shrinivasa Varakhedi, Dean, Faculty of Languages, Karnataka Samskrit University, Bangalore**

Chief Editor
Prof. Mallepuram G. Venkatesha
E-Mail : mallepuram@yahoo.com

Published by
Prasaranga
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet, Bangalore - 560018.
Ph: 080 - 26701303, 26705387
E-Mail: karnatakasanskrituniversity@gmail.com
Website : www.ksu.ac.in

First Impression: 2012
Copies : 1000
Page: viii + 24 = 32

Price: **Rs. 20/-**

ಸ್ವಾನ್ ಪ್ರಿಂಟರ್ಸ್
www.svanprinters.com
☎ 080-26742233

आमुखम्

जानन्त्येव हि तत्रभवन्तो भवन्तः यत् कर्नाटकसंस्कृतविश्वविद्यालयस्य प्रधानतमम् उद्देश्यद्वयं - वेदवेदान्तादिशास्त्रेषु उन्नताध्ययनव्यवस्थापानं, शोधकार्यञ्चेति । विशिष्य एतद्द्वारा शास्त्रवाङ्मयस्य तत्त्वं समाजे व्यापयितुं विशेषोपन्यासग्रन्थप्रकाशनादियोजनाभिः प्रयासः विहितः । तत्र अस्यां प्राच्यप्रबन्धमालायां नातिप्रथितेषु शास्त्रमार्गेषु अन्तःक्षेत्रीयविषयेषु कृतभूरिपरिश्रमैः विद्वद्वरेण्यैः विरचिताः प्रबन्धाः ग्रन्थरूपेण प्रकाशनीया इति अस्माकं सङ्कल्पः । एतदर्थं विश्वविद्यालयस्य अङ्गतया पृथक् प्रसाराङ्गं व्यवस्थापितम् । तस्य प्रथमकुसुमरूपेण वाक्यपदीयस्य प्रो. एन्. रङ्गनाथशर्ममहोदयैः कृतः कन्नडानुवादः प्रकाशितः । महिमभट्टकृतव्यक्तिविवेकस्य सोमेश्वरकृतायाः अभिलषितार्थचिन्तामणेः च कन्नडानुवादकार्यं स्वीकृतम् । अनेन संस्कृतकन्नडयोः सम्बन्धवर्धनं भविष्यतीति विश्वसिमः ।

महदिदं प्रमोदस्थानं यत् कौटिलीयार्थशास्त्रप्रकाशनेन भारतस्य प्रतिष्ठां दिगन्तेषु व्यापितवतां विद्वदग्रगण्यानां महामहोपाध्यायानां डा. आर्. शामशास्त्रिणां भाषाशास्त्रविषयकसंस्कृतप्रबन्धेन प्राच्यप्रबन्धमाला इयं समारब्धा इति । भाषाशास्त्रम् अधिकृत्य रचितोऽयं भाषातन्त्रम् इति प्रौढः प्रबन्धः आधुनिकभाषाशास्त्रानभिज्ञानां शास्त्रविदुषां प्रयोजनाय कल्पते । मैसूरुमहाराजसंस्कृतमहापाठशालापत्रिकायाम् अकस्मात् मम दृष्टिपथं गतस्य लेखस्यास्य पुनः प्रकाशनाय सम्पृष्टः प्रो. श्रीनिवासवरखेडिमहोदयः टिप्पणीसंवलितं प्रबन्धमिमं सम्पादितवानिति तमहम् अभिनन्दये । १९१२तमे वर्षे चामराजेन्द्रसंस्कृतमहापाठशालायाः प्राचार्यपदम् अलङ्कृतवतां डा. आर्. शामशास्त्रिवर्याणां तत्पदग्रहणशताब्दीं निमित्तीकृत्य अयं ग्रन्थः प्रकाशितः ।

भवदीयः विद्वद्वशंवदः

प्रो. मल्लेपुरं जि. वेङ्कटेशः

BHASHA TANTRAM by **Mahamahopadhyaya**
Dr. R. Shamashastry - An article published in the journal of
Mysore Maharaja Samskrita College in 1926,
Edited by - **Prof. Shrinivasa Varakhedi, Dean,**
Faculty of Languages, Karnataka Samskrit University, Bangalore

Chief Editor
Prof. Mallepuram G. Venkatesha
E-Mail : mallepuram@yahoo.com

Published by
Prasaranga
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet, Bangalore - 560018.
Ph: 080 - 26701303, 26705387
E-Mail: karnatakasanskrituniversity@gmail.com
Website : www.ksu.ac.in

First Impression: 2012

Copies : 1000

Page: viii + 24 = 32

Price: **Rs. 20/-**

ಸ್ವಾನ್ ಪ್ರಿಂಟರ್ಸ್
www.svanprinters.com
☎ 080-26742233

अस्मत्कुलपतीनां प्रो. मल्लेपुरं वेङ्कटेशमहोदयानां दृष्टिपथं गतः पुनःप्रकाशनाय मद्धस्तं प्रापितः । सोऽयं प्रबन्धः पाश्चात्यभाषाशास्त्रमार्गमजानतां विदुषां छात्राणां भाषाशास्त्रप्रवेशं परिकल्पयति। पाश्चात्यपरिकल्पितं तत्परिभाषासिद्धमपि शास्त्रार्थं अस्मच्छास्त्रमर्यादोचितया भाषया उपस्थापयतीति प्रबन्धस्यास्य वैशिष्ट्यम्।

अत्र आर्य-द्राविडभाषाणां जातिभेदसिद्धान्तः सदृष्टान्तं प्रतिपादितः। विशिष्टवर्णव्यत्ययलोपागमादिकारणैः शब्दरूपेषु जातानां परिणामानाम् अध्ययनेन ये नियमाः ग्रिम्-वर्नर् इत्यादिभिः विद्वद्भिः दर्शिताः, ते नियमाः अत्र सोदाहरणम् उपपादिताः। तत्र संस्कृतभाषायाः शब्द-धातुरूपेष्वपि वर्णविकाराः दृष्टान्तीकृताः। एतैः बहुभिः निर्णीतः सिद्धान्तः ग्रीक्-लाटिनादिपाश्चात्त्यभाषाः संस्कृतसगोत्राः इति।

परन्तु अस्ति किंचिदत्र अवधेयम् । न ब्रूमो वयं यत् ग्रीक्-लाटिन् आदिभाषाणां मातृस्थानीया काचिद् भाषा समासीत् । तस्या एव विकृतिरूपा इमा संस्कृतादयः काश्चित् भारतीयाः रोप्याश्च भाषां कन्नडादिभाषाः न संस्कृतसगोत्राः इति । तदेतद् ऊहामात्रम् । द्रविडभाषास्वपि संस्कृतच्छाया वर्तत एव । न केवलं शब्दरूपदर्शनमात्रेण भाषासापिण्ड्यं शक्यनिर्धारणम्; अपि तु भाषाणां वाक्यसंरचना-शब्दसम्पत्ति-समसनक्रमादिभिरपि साम्यवैषम्ये विचार्य सापिण्ड्यं निश्चेयम्। एवं हि वाक्याकृतिपरीक्षापद्धत्यनुसरणे द्रविडभाषाणामपि संस्कृतगोत्रापत्यत्वं दृष्टिगोचरं भवेत्। यदि च देशतः कालतः संस्कारतश्च सुदूरासु ग्रीकादिभाषासु संस्कृतच्छायादर्शनमात्रेण तासां एकगोत्रत्वसिद्धान्तः स्वीकृतः। तर्हि किमर्थं ततोऽपि सर्वप्रकारेण समीपवर्तिषु

प्रबन्धभूमिका

शतकद्वयात् पाश्चात्त्यदेशेषु भाषामधिकृत्य प्रवर्तमाना मीमांसा फिलालजी(Philology) नाम्ना प्रसिद्ध्यति स्म। तस्यैव भाषाशास्त्रस्य भाषातन्त्रमिति वा व्यवहारः। शास्त्रेऽस्मिन् नानाभाषाणां साम्य-वैषम्य-साजात्य-वैजात्यविचारपूर्वकं तासां सगोत्रत्व-विगोत्रत्वादिकं निर्णीयते। भाषाणाम् उत्पत्ति-स्वरूप-परिचयादिविषये सिद्धान्ताः निरूप्यन्ते। गच्छता कालेन तन्त्रमिदं विषयविस्तरेण भाषाविज्ञानमिति Linguistics नाम्ना प्रथितं वरीवर्ति। यत्र च भाषाणां न केवलं उत्पत्यादिकं साजात्य-वैजात्यादिकम्; अपि तु तासां आर्थिक-सामाजिक-राजकीयपरिवर्तनैः परिणामादिकमपि विषयः। भारतेऽपि भाषाविषयकविचारः परसहस्रवर्षेभ्यः प्रावर्तत। शब्दब्रह्मतत्त्वविचिकित्सायाः पराकाष्ठा आ अनुपलब्धात् व्याडिग्रन्थात् उपलभ्यमानभर्तृहरीयवाक्यपदीयग्रन्थपर्यन्तं पाणिनिपतञ्जल्याद्युपज्ञं ग्रन्थजातम् अद्यावधि सर्वोत्कृष्टमिति विद्वत्प्रशस्तिं भजते। एतच्छास्त्रविदुषाम् आधुनिकैः पाश्चात्त्यैः कीदृशं विनूतनं संशोधनं क्रियते? किंविधाः विचाराः विधीयन्ते? के तेषां सिद्धान्ताः? इति नैव परिचितम्। पाश्चात्य चिन्तनप्रणालीगन्धविधुराणां शास्त्रविदुषां तेषु विषयेषु मा भूत् परिभव इति बहुभिःप्राच्यप्रतीच्योभयविद्यास्थानेषु प्राप्तप्रवेशैः विद्वद्भिः सेतुबन्धप्रयासः विहितः। तेषु अन्यतमाः महामहोपाध्यायाः डा. आर् शामशास्त्रिणः। कौटिलीयार्थशास्त्रस्य प्रथमामवतरणिकाम् आधुनिकजगतः पुरस्तात् उपस्थाप्य भारतस्य कीर्तिं दिगन्तेषु विस्तारयतां पण्डितशामशास्त्रिणाम् अयमेकः भाषाशास्त्रविषयकः प्रबन्धः

मद्रास् विश्वविद्यालयतः बि.ए. पदवीं च प्राप्य, १९००तमे वर्षे प्राच्यविद्यासंशोधनालये पण्डितपदे नियुक्ताः । तस्मिन् एव अवधौ शोधमतयः शास्त्रिणः कौटिलीयार्थशास्त्रं संशोध्य आङ्ग्लानुवादसहितं प्रकाश्य विद्वत्प्रपञ्च एव अजरामरकीर्तिभाजः अभवन् । १९१९ वर्षे अमेरिकादेशस्य वाषिङ्गटन्विश्वविद्यालयेन गौरव-पिएच्.डि-उपाधिः प्रदत्ता । रायल् एशियाटिक् सोसैटि इत्यस्याः संस्थायाः सदस्यत्वगौरवमपि प्राप्तम् । १९२०तमे वर्षे कलकत्ताविश्वविद्यालयस्य कुलपतिभिः आशुतोषमुखर्जीमहोदयैः गौरवपिएच्.डि-उपाधिना सम्मानिताः । १९१२तः १९१८ पर्यन्तं श्रीचामराजेन्द्रसंस्कृत-महापाठशालायाः प्राचार्यपदे व्यराजन्त । वाराणसेयभारतधर्म-महामण्डलीद्वारा **महामहोपाध्याय**-उपाधिना (१९३०) **विद्यालङ्कार**बिरुदेन (१९२४) च विभूषिताः । १९४४वर्षस्य जनवरी २३दिनाङ्के दिवङ्गताः ।

तैः सम्पादिता: ग्रन्थाः - तैत्तिरीयप्रातिशाख्यम् (कस्तूरिरङ्गाचार्यैः सह)- (१९०६), बौधायनगृह्यसूत्रम् (१९२०), अर्थशास्त्रम् (१९१५), देवणभट्टस्य स्मृतिचन्द्रिका आशौचकाण्डं च (१९२१), वाराहगृह्यसूत्रम् (१९२१), योगानन्दस्य आयुर्वेदसूत्रम् (१९२२), अलङ्कारमणिहारः - सम्पुटत्रयम् (१९२३), विद्यामाधवकृतं विद्यामाधवीयम् (१९२५), मुहूर्तदीपिका (१९२६), तृतीयसोमेश्वरस्य अभिलषितार्थचिन्तामणिः (१९२६), प्रतापरुस्य सरस्वतीविलासः (१९२७), अर्थशास्त्रस्य द्वितीयं परिष्करणम् (१९१९), अर्थशास्त्रस्य तृतीयं परिष्करणम् (१९२४) ।

एतादृशे प्रशस्ते कर्मणि मां प्रेरितवतां सदैव विद्योपासकानां अस्मत्कुलपतीनां नमोवाकपूर्वकं कार्तज्ञं निवेदयामि । तैः प्रेरितोऽहं

संस्कृतप्रभावातिशयेन तदनुकारिषु द्रविडभाषासु संस्कृतसापिण्ड्यं कुतो न दृष्टम्? तस्मात् अन्धेनैव नीयमाना यथान्धा इतिवत् न तम्मार्गगामित्वं युक्तम्। आर्य-द्रविडभेदपट्टिकां निष्कास्य निमीलितचक्षुर्भ्यां पुनरवलोकनीयम् इति मम मतिः।

आस्तां तावत् इयं कथा यथातथम् । महामहोपाध्यायैः डा. रुद्रपट्णं शामशास्त्रिभिः विरचितोऽयं प्रबन्धः शतवर्षेभ्यः प्रागेव संस्कृतशास्त्राणां दृष्टिमोचक आसीत्। प्रज्ञा विवेकं लभते भिन्नैः आगमदर्शनैः । कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता।। इति भर्तृहरिवचनमत्र स्मर्तव्यम्।

इदं च प्रबन्धप्रसूनं १९२६तमे वर्षे मैसूरु महाराज त्रैमासिकपत्रिकायां संस्कृतमहापाठशालायाः प्रकाशितम्। तत्कालीनाः विशिष्टेषु विद्वदग्रगण्येषु अनुत्तमाः शास्त्रिणः १९१२ वर्षतः १९१८ पर्यन्तं बेङ्गलूरुनगरस्थितायाः श्रीचामराजेन्द्रसंस्कृतमहापाठशालायाः प्राचार्यत्वेन कार्यं निरवहन् । तदीयपदग्रहणशतमानोत्सववर्षे तत्रैव प्रतिष्ठापितेन संस्कृतविश्वविद्यालयेन M.Phil-विशिष्टाचार्य-शोधकक्षाः समारब्धाः । तदवसरे तैः लिखितस्य भाषातन्त्रम् इति शीर्षकाङ्कितस्य प्रबन्धस्य प्रकाशनं, तेषां सुरभारतीसेवामनुलक्ष्य समर्पितं श्रद्धागौरवकुसुममिति मे विज्ञापनम्।

गतशताब्दचक्रस्य सुरवाणीसमुपासकेषु विद्वत्सु मूर्धन्यानां **श्रीशामशास्त्रिणां** परिचयदानमत्र समुचितं भवति । मैसूरुप्रान्तीयरुद्रपट्टणग्रामे श्रोत्रियपरम्परायां वेङ्कटरमणय्यपुट्टम्मदम्पत्योः १८६८तमे वर्षे जनवरी २ दिने लब्धजनिः शामशास्त्री अल्पे वयसि संस्कृत-वेद-शिक्षां प्राप्तः । १८९१तमे वर्षे मैसूरु-महाराजसंस्कृतपाठशालायाम् अधीत्य साहित्यशास्त्रे विद्वत्पदवीं, १८९९

प्राच्यप्रबन्धमाला - १

भाषातन्त्रम्

कौटिलीयार्थशास्त्रसंशोधकेन विदुषा महामहोपाध्यायबिरुदभाजा

डा. आर्. शामशास्त्रिणा

विरचितः प्रबन्धः

सम्पादकः

प्रो. श्रीनिवास वरखेडी

प्रसाराङ्गम्

कर्नाटकसंस्कृतविश्वविद्यालयः

बेङ्गलूरु

२०१२

प्रबन्धमिमं संपाद्य तत्र तत्र टिप्पणीः संयोजितवान् । ग्रन्थप्रकाशने साह्यमाचरितवतोः डा.शीबा, विद्वान् उदयन इत्येतयोः साधुवादान् निरूपयामि। मदीयेऽस्मिन् उद्यमे सहकुर्वतां कुलसचिवस्य प्रो.सिद्देगौडमहोदयस्य, प्रसाराङ्गस्य उपनिर्देशकस्य प्रो.मेलुकोटे श्रीधरमहाभागस्य अन्येषां सहकर्मिणाञ्च धन्यवादाः।

१०-७-२०१२ विदुषां विधेयः

बेङ्गलूरु **श्रीनिवासः वरखेडी**

आमुखम्

जानन्त्येव हि तत्रभवन्तो भवन्तः यत् कर्नाटकसंस्कृतविश्वविद्यालयस्य प्रधानतमम् उद्देश्यद्वयं - वेदवेदान्तादिशास्त्रेषु उन्नताध्ययनव्यवस्थापानं, शोधकार्यञ्चेति । विशिष्य एतद्द्वारा शास्त्रवाङ्मयस्य तत्त्वं समाजे व्यापयितुं विशेषोपन्यासग्रन्थप्रकाशनादियोजनाभिः प्रयासः विहितः । तत्र अस्यां प्राच्यप्रबन्धमालायां नातिप्रथितेषु शास्त्रमार्गेषु अन्तःक्षेत्रीयविषयेषु कृतभूरिपरिश्रमैः विद्वद्वरेण्यैः विरचिताः प्रबन्धाः ग्रन्थरूपेण प्रकाशनीया इति अस्माकं सङ्कल्पः । एतदर्थं विश्वविद्यालयस्य अङ्गतया पृथक् प्रसाराङ्गं व्यवस्थापितम् । तस्य प्रथमकुसुमरूपेण वाक्यपदीयस्य प्रो. एन्. रङ्गनाथशर्ममहोदयैः कृतः कन्नडानुवादः प्रकाशितः । महिमभट्टकृतव्यक्तिविवेकस्य सोमेश्वरकृतायाः अभिलषितार्थचिन्तामणेः च कन्नडानुवादकार्यं स्वीकृतम् । अनेन संस्कृतकन्नडयोः सम्बन्धवर्धनं भविष्यतीति विश्वसिमः ।

महदिदं प्रमोदस्थानं यत् कौटिलीयार्थशास्त्रप्रकाशनेन भारतस्य प्रतिष्ठां दिगन्तेषु व्यापितवतां विद्वदग्रगण्यानां महामहोपाध्यायानां डा. आर्. शामशास्त्रिणां भाषाशास्त्रविषयकसंस्कृतप्रबन्धेन प्राच्यप्रबन्धमाला इयं समारब्धा इति । भाषाशास्त्रम् अधिकृत्य रचितोऽयं भाषातन्त्रम् इति प्रौढः प्रबन्धः आधुनिकभाषाशास्त्रानभिज्ञानां शास्त्रविदुषां प्रयोजनाय कल्पते । मैसूरुमहाराजसंस्कृतमहापाठशालापत्रिकायाम् अकस्मात् मम दृष्टिपथं गतस्य लेखस्यास्य पुनः प्रकाशनाय सम्पृष्टः प्रो. श्रीनिवासवरखेडिमहोदयः टिप्पणीसंवलितं प्रबन्धमिमं सम्पादितवानिति तमहम् अभिनन्दये । १९१२तमे वर्षे चामराजेन्द्रसंस्कृतमहापाठशालायाः प्राचार्यपदम् अलङ्कृतवतां डा. आर्. शामशास्त्रिवर्याणां तत्पदग्रहणशताब्दीं निमित्तीकृत्य अयं ग्रन्थः प्रकाशितः ।

भवदीयः विद्वद्वशंवदः

प्रो. मल्लेपुरं जि. वेङ्कटेशः

अस्मत्कुलपतीनां प्रो. मल्लेपुरं वेङ्कटेशमहोदयानां दृष्टिपथं गतः पुनःप्रकाशनाय मद्धस्तं प्रापितः । सोऽयं प्रबन्धः पाश्चात्यभाषाशास्त्रमार्गमजानतां विदुषां छात्राणां भाषाशास्त्रप्रवेशं परिकल्पयति। पाश्चात्यपरिकल्पितं तत्परिभाषासिद्धमपि शास्त्रार्थं अस्मच्छास्त्रमर्यादोचितया भाषया उपस्थापयतीति प्रबन्धस्यास्य वैशिष्ट्यम्।

अत्र आर्य-द्राविडभाषाणां जातिभेदसिद्धान्तः सदृष्टान्तं प्रतिपादितः। विशिष्टवर्णव्यत्ययलोपागमादिकारणैः शब्दरूपेषु जातानां परिणामानाम् अध्ययनेन ये नियमाः ग्रिम्-वर्नर् इत्यादिभिः विद्वद्भिः दर्शिताः, ते नियमाः अत्र सोदाहरणम् उपपादिताः। तत्र संस्कृतभाषायाः शब्द-धातुरूपेष्वपि वर्णविकाराः दृष्टान्तीकृताः। एतैः बहुभिः निर्णीतः सिद्धान्तः ग्रीक्-लाटिनादिपाश्चात्त्यभाषाः संस्कृतसगोत्राः इति।

परन्तु अस्ति किंचिदत्र अवधेयम् । न ब्रूमो वयं यत् ग्रीक्-लाटिन् आदिभाषाणां मातृस्थानीया काचिद् भाषा समासीत् । तस्या एव विकृतिरूपा इमा संस्कृतादयः काश्चित् भारतीयाः रोप्याश्च भाषां कन्नडादिभाषाः न संस्कृतसगोत्राः इति । तदेतद् ऊहामात्रम् । द्रविडभाषास्वपि संस्कृतच्छाया वर्तत एव । न केवलं शब्दरूपदर्शनमात्रेण भाषासापिण्ड्यं शक्यनिर्धारणम्; अपि तु भाषाणां वाक्यसंरचना-शब्दसम्पत्ति-समसनक्रमादिभिरपि साम्यवैषम्ये विचार्य सापिण्ड्यं निश्चेयम्। एवं हि वाक्याकृतिपरीक्षापद्धत्यनुसरणे द्रविडभाषाणामपि संस्कृतगोत्रापत्यत्वं दृष्टिगोचरं भवेत्। यदि च देशतः कालतः संस्कारतश्च सुदूरासु ग्रीकादिभाषासु संस्कृतच्छायादर्शनमात्रेण तासां एकगोत्रत्वसिद्धान्तः स्वीकृतः। तर्हि किमर्थं ततोऽपि सर्वप्रकारेण समीपवर्तिषु

प्रबन्धभूमिका

शतकद्वयात् पाश्चात्त्यदेशेषु भाषामधिकृत्य प्रवर्तमाना मीमांसा फिलालजी(Philology) नाम्ना प्रसिद्ध्यति स्म। तस्यैव भाषाशास्त्रस्य भाषातन्त्रमिति वा व्यवहारः। शास्त्रेऽस्मिन् नानाभाषाणां साम्य-वैषम्य-साजात्य-वैजात्यविचारपूर्वकं तासां सगोत्रत्व-विगोत्रत्वादिकं निर्णीयते। भाषाणाम् उत्पत्ति-स्वरूप-परिचयादिविषये सिद्धान्ताः निरूप्यन्ते। गच्छता कालेन तन्त्रमिदं विषयविस्तरेण भाषाविज्ञानमिति Linguistics नाम्ना प्रथितं वरीवर्ति। यत्र च भाषाणां न केवलं उत्पत्यादिकं साजात्य-वैजात्यादिकम्; अपि तु तासां आर्थिक-सामाजिक-राजकीयपरिवर्तनैः परिणामादिकमपि विषयः। भारतेऽपि भाषाविषयकविचारः परसहस्रवर्षेभ्यः प्रावर्तत। शब्दब्रह्मतत्त्वविचिकित्सायाः पराकाष्ठा आ अनुपलब्धात् व्याडिग्रन्थात् उपलभ्यमानभर्तृहरीयवाक्यपदीयग्रन्थपर्यन्तं पाणिनिपतञ्जल्याद्युपज्ञं ग्रन्थजातम् अद्यावधि सर्वोत्कृष्टमिति विद्वत्प्रशस्तिं भजते। एतच्छास्त्रविदुषाम् आधुनिकैः पाश्चात्त्यैः कीदृशं विनूतनं संशोधनं क्रियते? किंविधाः विचाराः विधीयन्ते? के तेषां सिद्धान्ताः? इति नैव परिचितम्। पाश्चात्य चिन्तनप्रणालीगन्धविधुराणां शास्त्रविदुषां तेषु विषयेषु मा भूत् परिभव इति बहुभिःप्राच्यप्रतीच्योभयविद्यास्थानेषु प्राप्तप्रवेशैः विद्वद्भिः सेतुबन्धप्रयासः विहितः। तेषु अन्यतमाः महामहोपाध्यायाः डा. आर् शामशास्त्रिणः। कौटिलीयार्थशास्त्रस्य प्रथमामवतरणिकाम् आधुनिकजगतः पुरस्तात् उपस्थाप्य भारतस्य कीर्तिं दिगन्तेषु विस्तारयतां पण्डितशामशास्त्रिणाम् अयमेकः भाषाशास्त्रविषयकः प्रबन्धः

मद्रास् विश्वविद्यालयतः बि.ए. पदवीं च प्राप्य, १९००तमे वर्षे प्राच्यविद्यासंशोधनालये पण्डितपदे नियुक्ताः । तस्मिन् एव अवधौ शोधमतयः शास्त्रिणः कौटिलीयार्थशास्त्रं संशोध्य आङ्ग्लानुवादसहितं प्रकाश्य विद्वत्प्रपञ्च एव अजरामरकीर्तिभाजः अभवन् । १९१९ वर्षे अमेरिकादेशस्य वाषिङ्गटन्विश्वविद्यालयेन गौरव-पिएच्.डि-उपाधिः प्रदत्ता । रायल् एशियाटिक् सोसैटि इत्यस्याः संस्थायाः सदस्यत्वगौरवमपि प्राप्तम् । १९२०तमे वर्षे कलकत्ताविश्वविद्यालयस्य कुलपतिभिः आशुतोषमुखर्जीमहोदयैः गौरवपिएच्.डि-उपाधिना सम्मानिताः । १९१२तः १९१८ पर्यन्तं श्रीचामराजेन्द्रसंस्कृत-महापाठशालायाः प्राचार्यपदे व्यराजन्त । वाराणसेयभारतधर्म-महामण्डलीद्वारा **महामहोपाध्याय**-उपाधिना (१९३०) **विद्यालङ्कार**बिरुदेन (१९२४) च विभूषिताः । १९४४वर्षस्य जनवरी २३दिनाङ्के दिवङ्गताः ।

तैः सम्पादिताः ग्रन्थाः - तैत्तिरीयप्रातिशाख्यम् (कस्तूरिरङ्गाचार्यैः सह)- (१९०६), बौधायनगृह्यसूत्रम् (१९२०), अर्थशास्त्रम् (१९१५), देवणभट्टस्य स्मृतिचन्द्रिका आशौचकाण्डं च (१९२१), वाराहगृह्यसूत्रम् (१९२१), योगानन्दस्य आयुर्वेदसूत्रम् (१९२२), अलङ्कारमणिहारः - सम्पुटत्रयम् (१९२३), विद्यामाधवकृतं विद्यामाधवीयम् (१९२५), मुहूर्तदीपिका (१९२६), तृतीयसोमेश्वरस्य अभिलषितार्थचिन्तामणिः (१९२६), प्रतापरुद्रस्य सरस्वतीविलासः (१९२७), अर्थशास्त्रस्य द्वितीयं परिष्करणम् (१९१९), अर्थशास्त्रस्य तृतीयं परिष्करणम् (१९२४) ।

एतादृशे प्रशस्ते कर्मणि मां प्रेरितवतां सदैव विद्योपासकानां अस्मत्कुलपतीनां नमोवाकपूर्वकं कार्तज्ञं निवेदयामि । तैः प्रेरितोऽहं

संस्कृतप्रभावातिशयेन तदनुकारिषु द्रविडभाषासु संस्कृतसापिण्ड्यं कुतो न दृष्टम्? तस्मात् अन्धेनैव नीयमाना यथान्धा इतिवत् न तम्मार्गगामित्वं युक्तम्। आर्य-द्रविडभेदपट्टिकां निष्कास्य निमीलितचक्षुर्भ्यां पुनरवलोकनीयम् इति मम मतिः।

आस्तां तावत् इयं कथा यथातथम् । महामहोपाध्यायैः डा. रुद्रपट्णं शामशास्त्रिभिः विरचितोऽयं प्रबन्धः शतवर्षेभ्यः प्रागेव संस्कृतशास्त्राणां दृष्टिमोचक आसीत्। प्रज्ञा विवेकं लभते भिन्नैः आगमदर्शनैः । कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता।। इति भर्तृहरिवचनमत्र स्मर्तव्यम्।

इदं च प्रबन्धप्रसूनं १९२६तमे वर्षे मैसूरु महाराज त्रैमासिकपत्रिकायां संस्कृतमहापाठशालायाः प्रकाशितम्। तत्कालीनाः विशिष्टेषु विद्वदग्रगण्येषु अनुत्तमाः शास्त्रिणः १९१२ वर्षतः १९१८ पर्यन्तं बेङ्गलूरुनगरस्थितायाः श्रीचामराजेन्द्रसंस्कृतमहापाठशालायाः प्राचार्यत्वेन कार्यं निरवहन् । तदीयपदग्रहणशतमानोत्सववर्षे तत्रैव प्रतिष्ठापितेन संस्कृतविश्वविद्यालयेन M.Phil-विशिष्टाचार्य-शोधकक्षाः समारब्धाः । तदवसरे तैः लिखितस्य भाषातन्त्रम् इति शीर्षकाङ्कितस्य प्रबन्धस्य प्रकाशनं, तेषां सुरभारतीसेवामनुलक्ष्य समर्पितं श्रद्धागौरवकुसुममिति मे विज्ञापनम्।

गतशताब्दचक्रस्य सुरवाणीसमुपासकेषु विद्वत्सु मूर्धन्यानां **श्रीशामशास्त्रिणां** परिचयदानमत्र समुचितं भवति । मैसूरुप्रान्तीयरुद्रपट्टणग्रामे श्रोत्रियपरम्परायां वेङ्कटरमणय्यपुट्टम्मदम्पत्योः १८६८तमे वर्षे जनवरी २ दिने लब्धजनिः शामशास्त्री अल्पे वयसि संस्कृत-वेद-शिक्षां प्राप्तः । १८९१तमे वर्षे मैसूरु-महाराजसंस्कृतपाठशालायाम् अधीत्य साहित्यशास्त्रे विद्वत्पदवीं, १८९९

गूढोत्मा वर्णविकृतेः वर्णनाशात्पृषोदरः।। इति।।

१०. सारूप्यभ्रान्तिरपि क्वचिच्छब्दस्वरूपविकाराय निमित्तं भवति - दिवस्पतिशब्दसारूप्यबुद्ध्या वनस्पतिः ऋतस्पतिः स्थपतिरित्यादयः शब्दा प्रयुक्ताः दृश्यन्ते। इन्द्राग्नीशब्दसारूप्यदृष्ट्या इन्द्रावरुणौ इन्द्रामरुतौ इति च प्रयोगो वर्तते।

देवीशब्दात्तृतीयायां देव्या इति भवति। एवं प्रियाशब्दात् तृतीयाविभक्तौ टापि प्रिया + आ = प्रिया इत्येव भवति। तथापि प्रियया इति प्रयोगः दृश्यते। वेदे दक्षिणा गुहा इति तृतीयाविभक्तौ प्रयोगो दृश्यते। पितुः इति षष्ठ्यन्तसारूप्यबुद्ध्या पत्युः सख्युः इति शब्दप्रयोगः कृतः। एवं पित्रे सादृश्यात् पत्ये सख्ये इति प्रयोगः।

क्वचित् अत्यन्तसाम्यम्

अथेदानीं संस्कृतझेंड्भाषयोः परस्परसाम्यं विशिष्य प्रदर्श्यते -

१. नकारमकाराभ्यां प्राक् संस्कृते श्रूयमाण अकारः झेंड्भाषायां ह्रस्वः एकारः भवति, क्वचित् इकारो भवति।

(१) सन्तं = हेन्तेम् उपमम् = उपेमेम् अहम् = अझेम्

(२) यम् = यिम् वाचम् = वाचिम् द्रुहम् = द्रुसिम्

२. यकारात्परतः ह्रस्वः एकारो भवति -

रोचयति = रोचयेति अयानि = अयेनि यज्ञः = येश्न

३. क्वचिद् ह्रस्वः दीर्घो वा ओकारो भवति।

(१) वसु = वोहु मक्षु = मोसु

(२) धामसु = दामोहु, अत्र दीर्घः।

४. ऋकारः एर्, अर् इति वा श्रूयते -

कृणोति = केरेणोति मृत्युः = मेरेथ्युस्

प्रबन्धमिमं संपाद्य तत्र तत्र टिप्पणीः संयोजितवान् । ग्रन्थप्रकाशने साह्यमाचरितवतोः डा.शीबा, विद्वान् उदयन इत्येतयोः साधुवादान् निरूपयामि। मदीयेऽस्मिन् उद्यमे सहकुर्वतां कुलसचिवस्य प्रो.सिद्देगौडमहोदयस्य, प्रसाराङ्गस्य उपनिर्देशकस्य प्रो.मेलुकोटे श्रीधरमहाभागस्य अन्येषां सहकर्मिणाञ्च धन्यवादाः।

१०-७-२०१२ विदुषां विधेयः

बेङ्गलूरु **श्रीनिवासः वरखेडी**

१३. सकारः हकारात्मना ज्ञः श्नात्मना च परिणमति।

कस्मै = कह्मै यज्ञः = यश्नो

सुबन्तप्रक्रिया सप्तविभक्तिषु चेत्थं दृश्यते।

गिरिः = गरिस्	दाता = दात	यज्ञः = यश्नो	
गरिस्	दातरेम्	यश्नो	यश्नाहो
गरिम्	दाथ्र	यश्नेम्	यश्ना
गरी	दाथ्रे	श्नया	यश्नैस्
गरोयिर्	दाथ्रत्	यश्नायि	यश्नेब्यो
गरोयिस्	दाथ्रो	यश्नाहे	यश्ननम्
गरा (गिरौ)	दातरे	यश्ने	यश्नेसु
		यश्न (सम्बुद्धौ)	

अहं = अझेम्	त्व = तूम्
अझेम्	तुम्
मन्	तु
मा	थ्वाम् थ्वा - इत्यादि।
मे	
मत्	
मन वाएम् नो	

इदानीं पार्सिनाम्ना ये प्रसिद्धा जना भरतखण्डे वर्तन्ते तेषां पुरातनानां भाषा झेंड्नाम्ना अवेस्थानाम्ना च प्रसिद्धा समासीत्। तस्यां भाषायां यानि यज्ञक्रियोपयुक्तानि सूक्तानि वर्तन्ते तानि वेदसूक्तसदृशानि दृश्यन्ते। कानिचित्तानि सूक्तान्यत्रोदाहरिष्यन्ते।

५. संस्कृते इर्, उर् इति वा श्रूयते -

हिरण्यस्य = झरण्येहे गिरिः = गरिस्

६. एकारः अए ओइ इति, ओकारः अओ, एउ इति दृश्येते।

७. (१) संयुक्तरेफात्प्राक् स्वरो निवेश्यते।

(२) पदे रेफान्ते, रेफोत्तरं स्वरो निवेश्यते -

अक्र = वहेद्र अन्तर् = अन्तरे

नप्तृ = नफेद्र स्वर् = ह्वरे

८. क्व चिद्वर्गप्रथमाः वर्गद्वितीया भवन्ति।

क्रतुः = ह्रमस् स्वप्नं = ह्वन्फेम्

प्रोक्त = फ्रोह्तो क्षत्रं = हथ्रम्

सत्य = हथ्यो द्रप्सः = द्रफ्सो

९. क्व चिद्वर्गचतुर्थाः वर्गतृतीया भवन्ति।

भ्राता = ब्रात उभाभ्याम् = उबोयिव्य

भ्यस् = ब्य मधु = मदु

१०. संस्कृतहकारः जकारो भवति।

हन्तारं = जन्तरेम् अर्हति = अरेजति

द्रुहं = द्रुजिम्

११. संस्कृतश्वः स्पः भवति।

विश्वं = विस्पेम् अश्वः = अस्पो

श्वेतं = स्पेयितेम्

१२. क्वचिद् हकारः जकारश्च झकारः भवति।

जात = झात हस्त = झस्त

यजते = यझते अहं = अझेम्

पत्नी	पत्नि	पोत्निय	...	...
विधवा	बेव	एधोस्	विदुअ	विदुवो
अर्भक	...	अर्पनास्	आर्बस्	अर्बि
जन	...	गेनास्	गेनुस्	कुनि
पशु	पसु	पेकुस्	...	फैहु
गो	गवो	बोस्	बास्	चुओ
श्वन्	स्पन्	कान्	कनिस्	हुन्ड्
अश्व	अस्म	इप्पोस्	एकुस्	एहु
पुत्र	पुत्र	पोलोस्	पुल्लुस्	प्सल
वृक	वेह्रक	लोकोस्	लुव्रीस्	वुल्फ्
मूक	...	मस्	मस्	मूस्
उद	...	उद्र	...	ओट्टर्
कोकिल	...	कोक्कूस्	कोकुलस्	कुचुक्
दम	...	डोमास्	डोमस्	तिम्रजन्
वास्तु	वान्ह्र	अस्तु	...	विस्ट्
पुर्	...	पोलिस्	...	...
पथि	पथी	पतोस्	पोन्स्	फाड्
मधु	मधु	मेधु	...	मेतु
रथ	रथ	रोत	...	राद्
मनस्	मनन्ह	मेनास्	मेन्स्	मुन्स्
जानामि	झन्	गिग्नास्को	ग्नोस्को	कन्
बोधामि	बुध्	पुन्थनोमै	...	नबियुदन्
देव	दैव	थियोस्	डियुस्	तिवर्
अग्नि	...	इग्निस्	...	ओग्नि
नक्त	...	नुक्	नाक्स्	नैध्ट

इदं संस्कृते पठ्यते।

तें अमवेन्तें यझतें।	तम् अमवन्तं यजतम्
सूरें दामोहु सेविस्तेम्	सूरं धामसु सविष्ठम्
मिथ्रें यझै झोथ्राव्यो	मित्रं यजै होत्राभ्यः
यिमहे क्षथ्रे और्वहे	यमस्य क्षत्रे और्वसे
नोयित् अओतें अन्ह नोयित् गरेमेस् ।	न शीतम् आसीत् न धर्मः।
नोयित् झौर्व अन्ह नोयित् मेरेथ्युस्।	न जरा आसीत् न मृत्युः
नोयित् अरस्को देयिवो दातो	न ईर्ष्या देवदत्ता
पञ्चदश फ्रचारोयि थे पित पुथ्रश्चरोदे स्व कतरश्चित्	पञ्चदश प्रचरतः पिता पुत्रश्च रोदयेष्वा कतरश्चित्
यवत क्षयोयित् ह्व थ्वो यिमो विवं हुतो पुथ्रो	यावदक्षियात् स्वध्वा यमः विवस्वतः पुत्रः

अत्र क्षत्रे = राज्ये, और्वसे = श्रेष्ठे, पञ्चदश = पञ्चदशवर्षस्थानीयः, प्रचरतः = सञ्चरतः, रोदयेषु = अकृतिषु, आ = समन्तात्, स्वध्वा = सुमार्गः, अक्षियत् = अवसत् इत्यर्थः।

तदित्थं झेंड् इति अवस्थेति च प्रसिद्धा पार्सिजनानां पुरातनेषु कृतप्रचारा भाषा संस्कृतगोत्रेति बाढं ज्ञायते। पार्सिजनपुरातनानां देवपूजोपयुक्तानि सूक्तानि वेदभाषासमानानीति स्पष्टं ज्ञायते।

अथेदानीं पूर्वं प्रतिपादितं संस्कृतग्रीक्लाटिन्भाषाणां परस्परसाम्यं न क्वचित्कम्, अपि तु सम्पूर्णमिति विशदयितुं यत्नः क्रियते। तासां परस्परसाम्यं सर्वनामशब्देषु विशदीभवति।

संस्कृतम्	**ग्रीक्**	**ल्याटिन्**
अहम्	एगो	एगो
माम्	मे	मिहि
मह्यम्	मायि	मिस्

गूढोत्मा वर्णविकृतेः वर्णनाशात्पृषोदरः।। इति।।

१०. सारूप्यभ्रान्तिरपि क्वचिच्छब्दस्वरूपविकाराय निमित्तं भवति - दिवस्पतिशब्दसारूप्यबुद्ध्या वनस्पतिः ऋतस्पतिः स्थपतिरित्यादयः शब्दा प्रयुक्ताः दृश्यन्ते। इन्द्राग्नीशब्दसारूप्यदृष्ट्या इन्द्रावरुणौ इन्द्रामरुतौ इति च प्रयोगो वर्तते।

देवीशब्दात्तृतीयायां देव्या इति भवति। एवं प्रियाशब्दात् तृतीयाविभक्तौ टापि प्रिया + आ = प्रिया इत्येव भवति। तथापि प्रियया इति प्रयोगः दृश्यते। वेदे दक्षिणा गुहा इति तृतीयाविभक्तौ प्रयोगो दृश्यते। पितुः इति षष्ठ्यन्तसारूप्यबुद्ध्या पत्युः सख्युः इति शब्दप्रयोगः कृतः। एवं पित्रे सादृश्यात् पत्ये सख्ये इति प्रयोगः।

क्वचित् अत्यन्तसाम्यम्

अथेदानीं संस्कृतझेंड्भाषयोः परस्परसाम्यं विशिष्य प्रदर्श्यते -

१. नकारमकाराभ्यां प्राक् संस्कृते श्रूयमाण अकारः झेंड्भाषायां ह्रस्वः एकारः भवति, क्वचित् इकारो भवति।

(१) सन्तं = हेन्तेम् उपमम् = उपेमेम् अहम् = अझेम्

(२) यम् = यिम् वाचम् = वाचिम् द्रुहम् = द्रुसिम्

२. यकारात्परतः ह्रस्वः एकारो भवति -

रोचयति = रोचयेति अयानि = अयेनि यज्ञः = येश्न

३. क्वचिद् ह्रस्वः दीर्घो वा ओकारो भवति।

(१) वसु = वोहु मक्षु = मोसु

(२) धामसु = दामोहु, अत्र दीर्घः।

४. ऋकारः एर्, अर् इति वा श्रूयते -

कृणोति = केरेणोति मृत्युः = मेरेथ्युस्

शब्दास्सङ्ख्यावाचकाश्शब्दाश्च संस्कृतसर्वनामसङ्ख्यावाचकशब्दसदृशा एव स्युः। यतो नैवमेतदस्ति ततः कर्णाटभाषा संस्कृतसगोत्रा नेति बाढं वक्तुं शक्यते। ग्रीक्-लाटिन्-आङ्ग्लेय-अवेस्थाभाषासु ते शब्दाः संस्कृतशब्दसदृशा वर्तन्ते इति तासां सगोत्रत्वं वक्तुं शक्यते। न केवलमेतेष्वेव शब्देषु तासां परस्परसाम्यम् अपि तु गृहोपयुक्तेषु बन्धुनामसु देवादिबोधकशब्देषु च तासां साम्यं वर्तते।

संस्कृत	**अवेस्थ**	**ग्रीक्**	**लाटिन्**	**गाथिक्**
पितृ	पितर्	पतर्	पतेर्	फादर्
तात	....	तात	तात	तेत्त
	अत्त	अत्त	अत्तन्	
		अप्प		
मातृ	मातर्	मेतेर्	मतेर्	मौतर्
सूनु	हुनु	...	...	सुनु
दुहितृ	दुग्धर्	ढुगेतर्	...	डाटर्
भ्रातृ	ब्रातर्	फ्रातेर्	फ्रेटेर्	ब्रोदर्
स्वसृ	ह्वन्हर्	...	सोरोर्	स्विस्टर्
पितृव्य	...	पत्रोस्	पत्रुस्	फतरो
श्वशुर	ह्वसुर	एकुरोस्	सोसेर्	स्वैहानान्
श्वश्रू	...	एकुर	सोक्रुस्	स्वैह्रो
जामातृ	झमातर्	गम्ब्रोस्	जेनेर्	...
स्नुषा	सुन्हार्	न्वास्	नुरुस्	स्नुर्
देवर	...	दायेर्	लोविर्	ताकोर्
पति	पैति	पोसिस्	पोतिस्	फात्

१३. सकारः हकारात्मना ज्ञः श्नात्मना च परिणमति।

कस्मै = कह्मै यज्ञः = यश्नो

सुबन्तप्रक्रिया सप्तविभक्तिषु चेत्थं दृश्यते।

गिरिः = गरिस्	दाता = दात	यज्ञः = यश्नो
गरिस्	दातरेम्	यश्नो यश्नाहो
गरिम्	दाथ्र	यश्नेम् यश्ना
गरी	दाथ्रे	श्नया यश्नैस्
गरोयिर्	दाथ्रत्	यश्नायि यश्नेब्यो
गरोयिस्	दाथ्रो	यश्नाहे यश्ननम्
गरा (गिरौ)	दातरे	यश्ने यश्नेसु
		यश्न (सम्बुद्धौ)

अहं = अझेम्	त्व = तूम्
अझेम्	तुम्
मन्	तु
मा	थ्वाम् थ्वा - इत्यादि।
मे	
मत्	
मन वाएम् नो	

इदानीं पार्सिनाम्ना ये प्रसिद्धा जना भरतखण्डे वर्तन्ते तेषां पुरातनानां भाषा झेंड्नाम्ना अवेस्थानाम्ना च प्रसिद्धा समासीत्। तस्यां भाषायां यानि यज्ञक्रियोपयुक्तानि सूक्तानि वर्तन्ते तानि वेदसूक्तसदृशानि दृश्यन्ते। कानिचित्तानि सूक्तान्यत्रोदाहरिष्यन्ते।

प्रयोजनम्

तदित्थं परीक्षायां कृतायां परश्शतानि परस्सहस्राणि च शब्दरूपाणि सादृश्यसूचकानि दृश्यन्ते। अत इदं सिद्ध्यति यद्भरतखण्डनिवासिनामार्याणां पुरातनैस्साकं ग्रीक्-लाटिन्-जर्मन्-आङ्ग्लैयावेस्थभाषाव्यवहारिणां पुरातनाः कुत्रचिदेकस्मिन् देशेऽवसन् । तेषां परस्परं [१९]यौनानुबन्धश्चासीत्। कुतश्चित्कारणात्ते भिन्नभिन्नदेशान्प्रापुः तेषामेकापि भाषा वर्ण-व्यत्ययाद्विभिन्नानेकरूपमावहत् इति ।।

एतत्सर्वभाषासाधारणशब्दार्थपर्यालोचनया कथं तेऽजीवन् ? कथमयुद्ध्यन्त ? कथं पत्तनान्यकुर्वन् ? लोहेषु कीदृशा लोहाः तैर्ज्ञाता आसन् ? देवेज्यादिकं कथं तेऽन्वतिष्ठन् ? कीदृशः तदानीं वर्णाश्रमविभागस्समवर्तत ? इत्यादीन् विषयान् निष्कृष्य तेषां चरित्रमपि वर्णयितुं शक्यते।

तदिदं शब्दभाषातन्त्रं[२०] पाश्चात्योपज्ञमिदानीमेधमानं (यास्कनिरुक्तसमालोचने भारतीयोपज्ञमित्यपि वक्तुं शक्यते) वर्तते। तदध्ययनं सप्रयोजनमित्यलम् ।

❖

---

१९. यौनानुबन्धो नाम योनिकृतः सम्बन्धः । शारीरबान्धव्यम् इत्यर्थः ।

२०. एतेषु निर्दिष्टेषु विषयेषु अद्यापि तत्र तत्र विद्वद्भिः प्रकाशिताः प्रबन्धाः केचन लभ्यन्ते । निष्कृष्टः कोऽपि इदमित्थमिति सिद्धान्तः नैव कृतो दृश्यते ।

त्वम्	सु	तुम्
त्वाम्	से	ते
ते	सायि,तायि	तिबि
सः	ओ	इस्टे
तम्	तोन्	इस्टुम्
तस्य	तायिओ	इस्टियुस्
तस्मात्	तोदे	इस्टो
तस्मिन्	पायि,तेयिदे	इस्टात्

सङ्ख्यावाचकशब्देषु चेत्थं साम्यं दृश्यते।

संस्कृतम्	**ग्रीक्**	**ल्याटिन्**
द्वौ	दुओ	दुओ
त्रयः	त्रिस्	त्रेस्
चत्वारः	तेत्तरेस्	क्वाट्टूर्
पञ्च	पेण्डे	क्विंके
षट्	डेक्स	सेक्स्
सप्त	हेफ्ट	सेप्टेम्
अष्ट	हेक्टो	आक्टो
नव	ऐन	नोवस्
दश	देक	देकेस्
एकादश	हेन्देक	एन्डेसिम्

विचारक्रमः

कर्णाटभाषा संस्कृतशब्दभूयिष्ठाऽपि सर्वनामशब्देषु सङ्ख्यावाचकशब्देषु च विषयेषु संस्कृतभाषायाः बाढं भिद्यते। यदि कर्णाटभाषा संस्कृतभाषासगोत्रा स्यात् तदा तस्यास्सर्वनाम-

५. संस्कृते इर्, उर् इति वा श्रूयते -

हिरण्यस्य = झरण्येहे गिरिः = गरिस्

६. एकारः अए ओइ इति, ओकारः अओ, एउ इति दृश्येते।

७. (१) संयुक्तरेफात्प्राक् स्वरो निवेश्यते।

(२) पदे रेफान्ते, रेफोत्तरं स्वरो निवेश्यते -

अक्र = वहेद्र अन्तर् = अन्तरे

नप्तृ = नफेद्र स्वर् = ह्वरे

८. क्व चिद्वर्गप्रथमाः वर्गद्वितीया भवन्ति।

क्रतुः = ह्रमस् स्वप्नं = ह्वन्फेम्

प्रोक्त = फ्रोह्तो क्षत्रं = हथ्रम्

सत्य = हथ्यो द्रप्सः = द्रफ्सो

९. क्व चिद्वर्गचतुर्थाः वर्गतृतीया भवन्ति।

भ्राता = ब्रात उभाभ्याम् = उबोयिव्य

भ्यस् = ब्य मधु = मदु

१०. संस्कृतहकारः जकारो भवति।

हन्तारं = जन्तरेम् अर्हति = अरेजति

द्रुहं = द्रुजिम्

११. संस्कृतश्वः स्पः भवति।

विश्वं = विस्पेम् अश्वः = अस्पो

श्वेतं = स्पेयितेम्

१२. क्वचिद् हकारः जकारश्च झकारः भवति।

जात = झात हस्त = झस्त

यजते = यझते अहं = अझेम्

पत्नी	पत्नि	पोत्निय	...	...
विधवा	बेव	एधोस्	विदुअ	विदुवो
अर्भक	...	अर्पनास्	आर्बस्	अर्बि
जन	...	गेनास्	गेनुस्	कुनि
पशु	पसु	पेकुस्	...	फैहु
गो	गवो	बोस्	बास्	चुओ
श्वन्	स्पन्	कान्	कनिस्	हुन्ड्
अश्व	अस्म	इप्पोस्	एकुस्	एहु
पुत्र	पुत्र	पोलोस्	पुल्लुस्	प्सल
वृक	वेह्र्क	लोकोस्	लुव्रीस्	वुल्फ्
मूक	...	मस्	मस्	मूस्
उद	...	उद्र	...	ओट्टर्
कोकिल	...	कोक्कूस्	कोकुलस्	कुचुक्
दम	...	डोमास्	डोमस्	तिम्रजन्
वास्तु	वान्ह	अस्तु	...	विस्ट्
पुर्	...	पोलिस्	...	...
पथि	पथी	पतोस्	पोन्स्	फाड्
मधु	मधु	मेधु	...	मेतु
रथ	रथ	रोत	...	राद्
मनस्	मनन्ह्	मेनास्	मेन्स्	मुन्स्
जानामि	झन्	गिग्नास्को	ग्नोस्को	कन्
बोधामि	बुध्	पुन्थनोमै	...	नबियुदन्
देव	दैव	थियोस्	डियुस्	तिवर्
अग्नि	...	इग्निस्	...	ओग्नि
नक्त	...	नुक्	नाक्स्	नैध्ट

इदं संस्कृते पठ्यते।

तें अमवेन्तें यझतें।	तम् अमवन्तं यजतम्
सूरें दामोहु सेविस्तेम्	सूरं धामसु सविष्ठम्
मिथ्रें यझै झोथ्राव्यो	मित्रं यजै होत्राभ्यः
यिमहे क्षथ्रे और्वहे	यमस्य क्षत्रे और्वसे
नोयित् अओतें अन्ह नोयित् गरेमेस् ।	न शीतम् आसीत् न धर्मः।
नोयित् झौर्व अन्ह नोयित् मेरेथ्युस्।	न जरा आसीत् न मृत्युः
नोयित् अरस्को देयिवो दातो	न ईर्ष्या देवदत्ता
पञ्चदश फ्रचारोयि थे पित पुथ्रश्चरोदे स्व कतरश्चित्	पञ्चदश प्रचरतः पिता पुत्रश्च रोदयेष्वा कतरश्चित्
यवत क्षयोयित् ह्व थ्वो यिमो विवं हुतो पुथ्रो	यावदक्षियात् स्वध्वा यमः विवस्वतः पुत्रः

अत्र क्षत्रे = राज्ये, और्वसे = श्रेष्ठे, पञ्चदश = पञ्चदशवर्षस्थानीयः, प्रचरतः = सञ्चरतः, रोदयेषु = अकृतिषु, आ = समन्तात्, स्वध्वा = सुमार्गः, अक्षियत् = अवसत् इत्यर्थः।

तदित्थं झेंड् इति अवस्थेति च प्रसिद्धा पार्सिजनानां पुरातनेषु कृतप्रचारा भाषा संस्कृतगोत्रेति बाढं ज्ञायते। पार्सिजनपुरातनानां देवपूजोपयुक्तानि सूक्तानि वेदभाषासमानानीति स्पष्टं ज्ञायते।

अथेदानीं पूर्वं प्रतिपादितं संस्कृतग्रीक्लाटिन्भाषाणां परस्परसाम्यं न क्वचित्कम्, अपि तु सम्पूर्णमिति विशदयितुं यत्नः क्रियते। तासां परस्परसाम्यं सर्वनामशब्देषु विशदीभवति।

संस्कृतम्	**ग्रीक्**	**ल्याटिन्**
अहम्	एगो	एगो
माम्	मे	मिहि
मह्यम्	मायि	मिस्

प्रयोजनम्

तदित्थं परीक्षायां कृतायां परश्शतानि परस्सहस्राणि च शब्दरूपाणि सादृश्यसूचकानि दृश्यन्ते। अत इदं सिद्ध्यति यद्भरतखण्डनिवासिनामार्याणां पुरातनैस्साकं ग्रीक्-लाटिन्-जर्मन्-आङ्ग्लैयावेस्थभाषाव्यवहारिणां पुरातनाः कुत्रचिदेकस्मिन् देशेऽवसन् । तेषां परस्परं [१९]यौनानुबन्धश्चासीत्। कुतश्चित्कारणात्ते भिन्नभिन्नदेशान्प्रापुः तेषामेकापि भाषा वर्ण-व्यत्ययाद्विभिन्नानेकरूपमावहत् इति ।।

एतत्सर्वभाषासाधारणशब्दार्थपर्यालोचनया कथं तेऽजीवन् ? कथमयुद्ध्यन्त ? कथं पत्तनान्यकुर्वन् ? लोहेषु कीदृशा लोहाः तैर्ज्ञाता आसन् ? देवेज्यादिकं कथं तेऽन्वतिष्ठन् ? कीदृशः तदानीं वर्णाश्रमविभागस्समवर्तत ? इत्यादीन् विषयान् निष्कृष्य तेषां चरित्रमपि वर्णयितुं शक्यते।

तदिदं शब्दभाषातन्त्रं[२०] पाश्चात्योपज्ञमिदानीमेधमानं (यास्कनिरुक्तसमालोचने भारतीयोपज्ञमित्यपि वक्तुं शक्यते) वर्तते। तदध्ययनं सप्रयोजनमित्यलम् ।

❖

१९. यौनानुबन्धो नाम योनिकृतः सम्बन्धः । शारीरबान्धव्यम् इत्यर्थः ।

२०. एतेषु निर्दिष्टेषु विषयेषु अद्यापि तत्र तत्र विद्वद्भिः प्रकाशिताः प्रबन्धाः केचन लभ्यन्ते । निष्कृष्टः कोऽपि इदमित्थमिति सिद्धान्तः नैव कृतो दृश्यते ।

शब्दास्सङ्ख्यावाचकाश्शब्दाश्च संस्कृतसर्वनामसङ्ख्यावाचकशब्दसदृशा एव स्युः। यतो नैवमेतदस्ति ततः कर्णाटभाषा संस्कृतसगोत्रा नेति बाढं वक्तुं शक्यते। ग्रीक्-लाटिन्-आङ्ग्लेय-अवेस्थाभाषासु ते शब्दाः संस्कृतशब्दसदृशा वर्तन्ते इति तासां सगोत्रत्वं वक्तुं शक्यते। न केवलमेतेष्वेव शब्देषु तासां परस्परसाम्यम् अपि तु गृहोपयुक्तेषु बन्धुनामसु देवादिबोधकशब्देषु च तासां साम्यं वर्तते।

संस्कृत	**अवेस्थ**	**ग्रीक्**	**लाटिन्**	**गाथिक्**
पितृ	पितर्	पतर्	पतेर्	फादर्
तात	....	तात	तात	तेत्त
	अत्त	अत्त	अत्तन्	
		अप्प		
मातृ	मातर्	मेतेर्	मतेर्	मौतर्
सूनु	हुनु	...	...	सुनु
दुहितृ	दुग्धर्	दुगेतर्	...	डाटर्
भ्रातृ	ब्रातर्	फ्रातेर्	फ्रेटेर्	ब्रोदर्
स्वसृ	ह्वन्हर्	...	सोरोर्	स्विस्टर्
पितृव्य	...	पत्रोस्	पत्रुस्	फतरो
श्वशुर	ह्वसुर	एकुरोस्	सोसेर्	स्वैहानान्
श्वश्रू	...	एकुर	सोक्रुस्	स्वैह्रो
जामातृ	झमातर्	गम्ब्रोस्	जेनेर्	...
स्नुषा	सुन्हार्	न्वास्	नुरुस्	स्नुर्
देवर	...	दायेर्	लोविर्	ताकोर्
पति	पैति	पोसिस्	पोतिस्	फात्

महदिदं प्रमोदस्थानं यत् कौटिलीयार्थशास्त्रप्रकाशनेन भारतस्य प्रतिष्ठां दिगन्तेषु व्यापितवतां विद्वदग्रगण्यानां महामहोपाध्यायानां डा. आर्. शामशास्त्रिणां भाषाशास्त्रविषयकसंस्कृतप्रबन्धेन प्राच्यप्रबन्धमाला इयं समारब्धा इति । भाषाशास्त्रम् अधिकृत्य रचितोऽयं भाषातन्त्रम् इति प्रौढः प्रबन्धः आधुनिकभाषाशास्त्रानभिज्ञानां शास्त्रविदुषां प्रयोजनाय कल्पते । मैसूरुमहाराजसंस्कृतमहापाठशालापत्रिकायाम् अकस्मात् मम दृष्टिपथं गतस्य लेखस्यास्य पुनः प्रकाशनाय सम्पृष्टः प्रो. श्रीनिवासवरखेडिमहोदयः टिप्पणीसंवलितं प्रबन्धमिमं सम्पादितवानिति तमहम् अभिनन्दये । १९१२तमे वर्षे चामराजेन्द्रसंस्कृतमहापाठशालायाः प्राचार्यपदम् अलङ्कृतवतां डा. आर्. शामशास्त्रिवर्याणां तत्पदग्रहणशताब्दीं निमित्तीकृत्य अयं ग्रन्थः प्रकाशितः ।

भवदीयः विद्वद्वशंवदः

प्रो. मल्लेपुरं जि. वेङ्कटेशः

Prasaranga
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet, Bangalore - 560018.
Ph: 080 - 26701303, 26705387
E-Mail: karnatakasanskrituniversity@gmail.com
Website : www.ksu.ac.in